श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीसूक्तम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानु॒जाय नमः

# ॥ श्रीसू॒क्तम् ॥

हिर॑ण्यवर्णां॒ हरि॑णीं सु॒व॒र्णर॑ज॒तस्र॑जाम्।
च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह॥
तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी᳚म्।
यस्यां॒ हिर॑ण्यं वि॒न्देयं॒ गामश्वं॒ पुरु॑षान॒हम्॥
अ॒श्व॒पू॒र्वां र॑थम॒ध्यां ह॒स्तिना॑द प्र॒बोधि॑नीम्।
श्रियं॑ दे॒वीमुप॑ह्वये॒ श्रीर्मा॑दे॒वी जु॑षताम्॥
कां॒ सो॒स्मि॒तां हिर॑ण्यप्राकारामा॒र्द्रां ज्वल॑न्तीं तृ॒प्तां त॒र्पय॑न्तीम्।
प॒द्मे॒ स्थि॒तां प॒द्मव॑र्णां॒ त्वामि॒होप॑ह्वये॒ श्रियम्॥
च॒न्द्रां प्र॑भा॒सां यश॑सा॒ ज्वल॑न्तीं॒ श्रियं॑ लो॒के दे॒वजु॑ष्टामु॒दा॒राम्।
तां प॒द्मने॑मीं॒ शर॑णम॒हं प्रप॑द्ये॒ऽल॒क्ष्मीर्मे᳚ नश्यतां॒ त्वां वृ॑णे॥
आ॒दि॒त्यव॑र्णे॒ तप॒सोऽधि॑ जा॒तो वन॒स्पति॒स्तव॑ वृ॒क्षोथ॑ बि॒ल्वः।
तस्य॒ फला॑नि॒ तप॒सा नु॑दन्तु मा॒यान्त॑रा॒याश्च॑ बा॒ह्या अ॑ल॒क्ष्मीः॥
उपै॑तु॒ मां दै॑वस॒खः की॒र्तिश्च॒ मणि॑ना स॒ह।
प्रा॒दु॒र्भू॒तोऽस्मि॑ रा॒ष्ट्रेऽस्मि॒न् की॒र्तिमृद्धिं॑ द॒दा॒तु मे॥
क्षु॒त्पि॑पा॒साम॑लां ज्ये॒ष्ठाम॒ल॒क्ष्मीर्ना॑शया॒म्यहम्।
अभू॑तिम॒समृ॑द्धिं॒ च सर्वां॒ निर्णु॑द मे॒ गृहात्॥
ग॒न्ध॒द्वा॒रां दु॑राध॒र्षां॒ नि॒त्यपु॑ष्टां करी॒षिणी᳚म्।
ई॒श्वरी॑गं॒ सर्व॑भूता॒नां॒ तामि॒होप॑ह्वये॒ श्रियम्॥

www.prapatti.com

मन॑सः॒ काम॒माकू॑तिं वा॒चस्स॒त्यम॑शीमहि।
प॒शू॒नां रू॒पमन्न॑स्य॒ मयि॒ श्रीश्श्र॑यतां॒ यश॑ः॥
क॒र्दमे॑न प्र॑जा भू॒ता॒ म॒यि॒ सं॒भ॑व क॒र्दम।
श्रियं᳚ वा॒सय॑ मे कु॒ले मा॒तरं॑ प॒द्ममा॒लि॑नीम्॥
आप॑ः सृ॒जन्तु॑ स्नि॒ग्धा॒नि॒ चि॒क्ली॒त व॑स मे॒ गृहे।
नि च॑ दे॒वीं मा॒तरं॒ श्रियं᳚ वा॒सय॑ मे कु॒ले॥
आ॒र्द्रां पु॒ष्करि॑णीं पु॒ष्टिं॒ पि॒ङ्ग॒ळां प॑द्ममा॒लि॒नीम्।
च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं॒ जात॑वेदो म॒ आव॑ह॥
आ॒र्द्रां य॒ः करि॑णीं य॒ष्टिं॒ सु॒व॒र्णां हे॑ममा॒लि॒नीम्।
सू॒र्यां᳚ हि॒रण्म॑यीं ल॒क्ष्मीं॒ जात॑वेदो म॒ आव॑ह॥
तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी᳚म्।
यस्यां॒ हिर॑ण्यं॒ प्रभू॑तं॒ गावो॑ दा॒स्योऽश्वा᳚न् वि॒न्देयं॒ पुरु॑षान॒हम्॥
पद्मप्रिये पद्मिनि प॑द्महस्ते पद्मालये पद्मदळा॑यता॒क्षि।
विश्वप्रिये विष्णु॒मनो॑ऽनु॒कूले त्वत्पा॑दप॒द्मं मयि॒ सन्नि॑धत्स्व॥
श्रियै॑ जा॒त श्रिय॒ आनि॑र्या॒य॒ श्रियं॒ वयो॑ जनि॒तृभ्यो॑ दधातु॥
श्रियं॒ वसा॑ना अमृत॒त्वमा॒य॒न् भव॑न्ति स॒द्यस्समि॒धा मि॒तद्रू॒न्॥

श्रिय एवैनं तच्छ्रियामा॑दधा॒ति। सन्ततमृचा वषट्कृत्यं सन्धत्तं सन्धीयते प्रज॑या प॒शुभि॑ः। य ए॑वं वे॒द॥ ओं म॒हा॒दे॒व्यै च॑ वि॒द्महे॑ विष्णु॒प॒त्न्यै च॑ धीमहि। तन्नो॑ लक्ष्मीः प्रचो॒दया᳚त्॥